**Code No.: US-03**

Total No. of Questions : 5 Total No. of Printed Pages : 2

# स्नातकोत्तरपरीक्षाः– २०१५

## एम्.ए. – विद्वदुत्तमा – द्वितीयवर्षम्

## शास्त्रम् – अलङ्कारशास्त्रम्

### भागः – २, पत्रिका – ३

### विषयः – ध्वन्यालोकः – २

**दिनाङ्कः –** 27-3-2015 **गरिष्ठाङ्काः – ८०**

**समयः –** 2.30 P.M. to 5.30 P.M. Max. Marks – 80

---

**I.** संक्षिप्तमुत्तरं लिखत – **10 × 1 = 10**

१. या निशा सर्वभूतानां तस्यां जागर्ति संयमी – इदं कस्य ध्वनिप्रभेदस्य उदाहरणम्?

२. रसस्य परा उपनिषत् का?

३. को ध्वनिः वर्णपदादिषु वाक्ये सङ्घटनायां प्रबनधेपि दीप्यते?

४. अव्युत्पत्तिकृतो दोषः कया संव्रियते।

५. सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते – इदं कस्य वचनम्?

६. न तन्मुख्यं काव्यम्, काव्यानुकारोह्यसौ – अयं काव्यप्रकारः कः?

७. स्मितं किञ्चिन्मुग्धमित्यत्र मुग्धशब्दस्य लक्ष्यार्थः कः?

८. अतथास्थितानपि अर्थविशेषान् तथास्थितानिव हृदये का निवेशयति?

९. स्वभावतः शुद्धस्यापि वाच्यस्य आनन्त्यं कैर्जायते?

१०. महाभारते को रसः प्रधानः?

**II.** वाक्यत्रयं सप्रसङ्गं व्याख्यात। **3 × 5 = 15**

१. पदद्योत्येन सुकवेर्ध्वनिना भाति भारती।

२. पदपौनरुक्त्यं च व्यञ्जकत्वापेक्षयैव कदाचित् प्रयुज्यमानं शोभामावहति।

३. प्रबन्धे चाङ्गी रस एक एवोपनिबध्यमानोऽर्थविशेषलाभं छायातिशयं च पुष्णाति।

४. नहि शरीरी शरीरिणां सदृशोऽप्येक एवेति शक्यते वक्तुम्।

५. अनेनानन्त्यमायाति कवीनां प्रतिभागुणः।

**Code No.: US-03**

**III.** त्रयणामुत्तरं लिखत। **3 × 10 = 30**

१. सङ्घटना गुणाश्चेति अनयोः सम्बन्धविषये मतभेदं सविस्तरं प्रतिपादयत।

२. प्रबन्धस्य रसाभिव्यञ्जकत्वे निबन्धनानि कानि? विशदयत।

३. अप्रस्तुतप्रशंसायाम् अप्रस्तुतस्य विवक्षितत्वादिना त्रिविधत्वं सोदाहरणं स्पष्टयत।

४. महाभारतस्य शान्तसप्रधानत्वमुपपादयत।

५. वाणी नवत्वमायाति पूर्वार्थान्वयवत्यपि – संलक्ष्यक्रमव्यंग्यध्वनिप्रभेदस्य समाश्रयणेन एतदुपपादयत।

**IV.** पद्यत्रयं सप्रसङ्गं व्याख्याय तत्रत्यं विशेषं सयुक्तिं निर्णयत। **3 × 5 = 15**

१. मुहुरङ्गुलिसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामम्।
मुखमंसविवर्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्बितं तु।।

२. एकन्तो रुअइ पिआ अण्णन्तो समरतूरणिग्घोसो।
णेहेण रणरसेण अ अडस्स दोलाइअं हिअअम्।।

३. लक्ष्मीर्दुहिता जामातृको हरिः तथा गृहिणी गङ्गा।
अमृतमृगाङ्कौ च सुतौ अहो कुटुम्बं महोदधेः।

४. एवमेव जनस्तस्य ददाति कपोलोपमायां शशिबम्बिम्।
परमार्थविचारे पुनश्चन्द्रश्चन्द्र इव वराकः।।

**V.** कारिकाद्वयं सप्रसङ्गं व्याख्यात। **2 × 5 = 10**

१. प्रबन्धे मुक्तके वापि रसादीन् बन्धुमिच्छता।
यत्नः कार्यः सुमतिना परिहारे विरोधिनाम्।

२. श्रृङ्गारी चेत्कविः काव्ये जातं रसमयं जगत्।
स एव वीतरागश्चेन्नीरसं सर्वमेव तत्।।

३. संवादो ह्यन्यसादृश्यं तत्पुनः प्रतिबिम्बवत्।
आलेख्याकारवत्तुल्यदेहिवच्च शरीरिणाम्।

---